श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विभीषण कृत

# ॥ श्री आपदुद्धारण हनूमत्स्तोत्रम् ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री आपदुद्धारण हनूमत्स्तोत्रम् ॥

अस्य श्रीआपदुद्धारणहनूमत्स्तोत्र महामन्त्रस्य।
विभीषण ऋषिः। आपदुद्धारणो हनूमान् देवता।
आपदुद्धारणहनूमत्प्रसादसिद्ध्यर्थे जपे विनियोगः॥

वामे करे वैरिभीतं वहन्तं
शैलं परे शृङ्खलहारिटङ्कम्।
दधानमच्छच्छवियज्ञसूत्रं
भजे ज्वलत्कुण्डलमाञ्जनेयम्॥ १ ॥

सुपीतकौपीनमुदञ्चिताङ्गुलिं
समुज्वलन्मौञ्ज्यजिनोपवीतिनम्।
सकुण्डलं लम्बशिखासमावृतं
तमाञ्जनेयं शरणं प्रपद्ये॥ २ ॥

आपन्नाखिललोकार्तिहारिणे श्रीहनूमते।
अकस्मादागतोत्पातनाशनाय नमोऽस्तु ते॥ ३ ॥

सीतावियुक्तश्रीरामशोकदुःखभयापह।
तापत्रितयसंहारिन् आञ्जनेय नमोऽस्तु ते॥ ४ ॥

आधिव्याधिमहामारि ग्रहपीडापहारिणे।
प्राणापहर्त्रे दैत्यानां रामप्राणात्मने नमः॥ ५ ॥

संसारसागरावर्त कर्तव्यभ्रान्तचेतसाम्।
शरणागतमर्त्यानां शरण्याय नमोऽस्तुते॥ ६ ॥

राजद्वारि बिलद्वारि प्रवेशे भूतसङ्कुले।
गजसिंहमहाव्याघ्रचोरभीषणकानने॥ ७ ॥

www.prapatti.com

शरणाय शरण्याय वातात्मज नमोऽस्तु ते।
नमः प्लवङ्गसैन्यानां प्राणभूतात्मने नमः॥ ८ ॥

रामेष्टं करुणापूर्णं हनूमन्तं भयापयम्।
शत्रुनाशकरं भीमं सर्वाभीष्टफलप्रदम्॥ ९ ॥

प्रदोषे वा प्रभाते वा ये स्मरन्त्यञ्जनासुतम्।
अर्थसिद्धिं यशः कीर्तिं प्राप्नुवन्ति न संशयः॥ १० ॥

कारागृहे प्रयाणे च सङ्ग्रामे देशविप्लवे।
ये स्मरन्ति हनूमन्तं तेषां नास्ति विपत्तदा॥ ११ ॥

वज्रदेहाय कालाग्निरुद्रायामिततेजसे।
ब्रह्मास्त्रस्तम्भनायास्मै नमः श्रीरुद्रमूर्तये॥ १२ ॥

जप्त्वा स्तोत्रमिदं मन्त्रं प्रतिवारं पठेन्नरः।
राजस्थाने सभास्थाने प्राप्तवाते जपेद्ध्रुवम्॥ १३ ॥

विभीषणकृतं स्तोत्रं यः पठेत् प्रयतो नरः।
सर्वापद्भ्यो विमुच्येत नात्र कार्या विचारणा॥ १४ ॥

मर्कटेश महोत्साह सर्वशोकविनाशन।
शत्रून् संहर मां रक्ष श्रियं दासांश्च देहि मे॥ १५ ॥

॥ इति श्री आपदुद्धारण हनूमत्स्तोत्रं संपूर्णम् ॥

www.prapatti.com